# अथ लक्ष्मीद्वादशनामस्तोत्रम्

श्रीदेवी प्रथमं नाम द्वितीयममृतोद्भवा ।
तृतीयं कमला प्रोक्ता चतुर्थं चन्द्रलोचना ॥१॥
पञ्चमं विष्णुपत्नी च षष्ठं श्रीवैष्णवी तथा ।
सप्तमं च वरारोहा ह्यष्टमं हरिवल्लभा ॥२॥
नवमं शार्ङ्गिणी प्रोक्ता दशमं देवदेविका ।
एकादशं महालक्ष्मीः द्वादशं लोकसुन्दरी ॥३॥
श्रीः पद्मा कमला मुकुन्दमहिषी लक्ष्मीस्त्रिलोकेश्वरी
मा क्षीराब्धिसुता विरिञ्चजननी विद्या सरोजानना ।
सर्वाभीष्टफलप्रदेति सततं नामानि ये द्वादश
प्रातः शुद्धतरा पठन्त्यभिमतान् सर्वान् लभन्ते गुणान् ॥४॥
श्रीलक्ष्मीहृदयं चैतन्नामद्वादशयुग्मकम् ।
त्रिवारं पठते यस्तु सर्वैश्वर्यमवाप्नुयात् ॥५॥